दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-257 | 1 | जुलाई 09, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढकृष्णनवमी
आषाढः 25 प्रविष्टांशः मङ्गलमयः भवेत्

2 भारतस्य प्राचीनज्ञानपरम्परा कृत्रिमबुद्धिमत्तया (AI) प्राप्स्यति नूतनजीवनम् - प्रो. श्रीनिवासवरखेड़ी

3 २३ लक्षोपभोक्तृणां ई-केवाईसी (e-KYC), १८ लक्षजनेभ्यः द्वि-विद्युन्मानके साहाय्यकधनस्य लाभः

4 'पिनाका' इति सुदीर्घदूरीप्रहारक-रॉकेट-प्रणाल्याः सफलं परीक्षणम्

## प्रधानमन्त्रिणा इण्डोनेशिया-देशस्य योग्यकार्ता-नगरे संस्थिते यूनेस्को विश्व-न्यास-स्थले प्रम्बानन-मन्दिर-परिसरे मुख्य-शिव-मन्दिरे विशेष पूजार्चना कृता




प्रधानमन्त्री नरेन्द्रमोदी गतदिने इण्डोनेशिया-देशस्य योग्यकार्ता-नगरे संस्थिते यूनेस्को विश्व-न्यास-स्थले प्रम्बानन-मन्दिर-परिसरे इण्डोनेशिया-राष्ट्रपतिना प्रबोवो सुबियान्तो इत्यमुना साकं भ्रमणम् अकरोत्। तत्र पारम्परिक गैमेलन-सङ्गीत-ध्वनिभिः शास्त्रीय नृत्यैश्च प्रधानमन्त्रिणः अभूतपूर्वम् अभिनन्दनं विहितम्। नवम-शताब्द्याः अस्य मन्दिर परिसरस्य अवलोकनावसरे प्रधानमन्त्रिणा मुख्य-शिव-मन्दिरे विशेष पूजार्चना कृता, सहैव भारत-इण्डोनेशिया-देशयोः सहयोगेन मन्दिरस्य संरक्षण-प्रयासाः दृष्टाः। एकस्मिन् संयुक्त वक्तव्ये राष्ट्रपतिना प्रबोवो इत्यमुना प्रतिपादितं यत्, प्रम्बानन-मन्दिरं भारत-इण्डोनेशिया-देशयोः शतशः वर्षाणां प्राचीन सभ्यतायाः प्रतीकभूतं वर्तते, मन्दिरस्य पुनरुद्धाराय च तेन भारताय कार्तज्ञं आविष्कृतम् । अत्रावसरे प्रधानमन्त्रिणा निगदितं यदियं यात्रा अतीव आध्यात्मिकी अविस्मरणीया च अजायत । द्वादश-शताब्दैः अस्य न्यासस्य संरक्षणाय श्रीमोदी इंडोनेशियाजनेभ्यः धन्यवादं विज्ञापितवान्। जकार्ता-नगरे द्विपक्षीय वार्तानन्तरं प्रेषिते संयुक्ते घोषणापत्रे भारत-इण्डोनेशिया देशाभ्यां सर्वविध-आतङ्कवादस्य तीव्रा निन्दा विहिता। द्वयोः देशयोः नेतृभ्याम् अन्ताराष्ट्रिय-नियमानुसारेण आतङ्कवादस्य सम्मुखं दृढ-वैश्विक प्रयासस्य आह्वानं विहितम्। उभाभ्यां प्रमुखाभ्यां वैश्विकस्तरे प्रतिबन्धितानां आतङ्कवादिनां सङ्घटनानां च विरुद्ध कठोर कार्यचरणाय बलं प्रदत्तम् । उग्रवाद-विरोधी-सहयोगं च दृढीकर्तुन सहमतिः प्रकटिता।स्वस्य त्रिदेशीय-प्रवासस्य द्वितीये चरणे प्रधानमन्त्री अयैव त्रीणि दिनानि यावत् ऑस्ट्रेलिया-देशस्य मेलबर्ननगरं प्राप्स्यति। तत्र सः ऑस्ट्रेलिया-प्रधानमन्त्रिणा एन्थनी अल्बनीज इत्यनेन साकं तृतीये भारत-ऑस्ट्रेलिया-वार्षिक-शिखर सम्मेलने भागं ग्रहीष्यति। अनेन साकमेव, सः भारत-ऑस्ट्रेलिया-सीईओ-फोरम इत्यस्मिन् उभयदेशस्य शीर्ष-उद्योगपतीन् तथा च मेलबर्न नगरे प्रवासी-भारतीय-सभां सम्बोधयिष्यति ।

### सुभाषितम्

**शुभेन कर्मणा सौख्यं,**
**दुःखं पापेन कर्मणा।**
**कृतं फलति सर्वत्र,**
**नाकृतं भुज्यते क्वचित्।।**

अर्थात्- शुभ कर्म से सुख तथा पाप कर्म से दुःख प्राप्त होता है। सर्वत्र कर्म ही फल देता है, बिना किए हुए कर्म का फल कहीं नहीं भोगा जाता।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला ज़िला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## ईरान-देशेन सह सैन्य-सङ्घर्ष निर्वापयितुं हस्ताक्षरितं संधि-ज्ञापनं सम्प्रति समाप्तिपदं सम्प्राप्तो विद्यते-ट्रम्पः

अमरीका-राष्ट्रपतिः डोनाल्ड ट्रम्पः उदघोषयत् यत् ईरान-देशेन सह सैन्य-सङ्घर्ष निर्वापयितुं हस्ताक्षरितं संधि-ज्ञापनं सम्प्रति समाप्तिपदं सम्प्राप्तो विद्यते। तेन अग्रे प्रतिपादितं यत् अमरीका सम्प्रति तेहरान-प्रशासनेन सह सम्भाषणं कर्तुं नैव वांछति। राष्ट्रपतेः ट्रम्पस्य इदं वक्तव्यं तुर्की-देशस्य राजधान्यां 'अङ्कारा' नगरे आयोजिते नाटो शिखर सम्मेलनस्य वार्ताहरसम्मेलने आगतम्। एषः घटनाक्रमः होर्मुजजलपोते त्रिषु तैलग्राहक पोतेषु अस्त्र प्रहारेण सञ्जातस्य विवादस्य पश्चात् अमरीका-ईरानदेशयोः मध्ये प्रवृत्तस्य प्रत्यक्ष-सैन्य-आक्रमणस्य परिणामो वर्तते। यद्यपि ईराननेन अस्य आक्रमणस्य उत्तरदायित्वं प्रत्यक्षतया नैव अंगीकृतम्। वाशिंगटन-तेहरानयोः मध्ये कृतः अयं युद्धविराम-संधिः षष्ठी दिनानां समयं प्रदातुं विहितः आसीत्, परन्तु कतर-देशे प्रवृत्ता अप्रत्यक्ष-वार्ता सकारात्मकं परिणामं विनैव समाप्ता। यस्य फलस्वरूपं गतरात्रौ अमरीकी सेना ईरान-विरुद्धं नूतन शृङ्खलायाः आक्रमणम् अकरोत्। इतः प्राक्, अमरीका द्वारा ईरानस्य 'होरमोजगान' प्रान्ते तथा च 'माहशह' इति पत्तन नगरे कृतानां आक्रमणानां प्रतिकारे ईराननेनापि अमरीकी-सैन्य-प्रतिष्ठानेषु तीव्राः प्रहाराः विहिताः आसन्।

## केन्द्रीय-गृहमन्त्री अमितशाहः अतिवृष्ट्या, जलौघ-सदृश परिस्थित्या, सहैव भूस्खलनेन प्रभावितानां सङ्कटग्रस्तानां ३ राज्यानां मुख्यमन्त्रिभिः साकं दूरभाषेण सम्भाषणं विहितवान्




केन्द्रीय-गृहमन्त्री अमितशाहः अतिवृष्ट्या, जलौघ-सदृश परिस्थित्या, सहैव भूस्खलनेन प्रभावितानां सङ्कटग्रस्तानां अनेकेषां राज्यानां मुख्यमन्त्रिभिः साकं दूरभाषेण सम्भाषणं विहितवान्। तेभ्यः केन्द्रसर्वकारस्य पक्षतः सम्भाव्य-सर्वविध-साहाय्यस्य दृढाश्वासनं च असौ अयच्छत्। श्रीशाहेन महाराष्ट्रराज्ये भीषण-अतिवृष्ट्याः जलप्लावनस्य च स्थितेः समीक्षां कर्तुं महाराष्ट्रस्य मुख्यमन्त्रिणा देवेन्द्र फडणवीसेन सह विशेष-चर्चा अकारि। संवादावधौ गृहमन्त्रिणा मुख्यमन्त्रिणं प्रति सङ्कटकाले महाराष्ट्र-सर्वकारस्य सहयोगार्थं केन्द्रीय-प्रशासनात् सर्वविध-साहाय्य-प्रदानस्य प्रतिश्रुतिः अभिव्यक्ता। विगत-दिवसेषु महाराष्ट्रस्य विविधाः भूभागाः अविरत अतिवृष्ट्या अत्यधिकं प्रभाविताः सन्ति।अनेन सहैव, गृहमन्त्रिणा गुजरातराज्ये अतिवृष्ट्या जल-अवरोध-स्थितेः सन्दर्भे गुजरातस्य मुख्यमन्त्रिणा भूपेन्द्र पटेलेन साकमपि मन्त्रणा कृता, राज्यस्य कृते च केन्द्रस्य पूर्ण-सहयोगस्य सङ्कल्पः घोषितः।अपरतः, एकस्मिन् सामाजिकान्तर्जालीय-सन्देशे केरलस्य मुख्यमन्त्री वी. डी. सतीशनः सूचितवान् यत् केन्द्रीय गृहमन्त्री अमितशाहः दूरभाष माध्यमेन तेन सह संवादं कृत्वा 'वायनाड-आपदा' विषये सविस्तारं पृष्टवान्। श्रीसतीशनमहोदयेन ज्ञापितं यत् गृहमन्त्रिणा स्थितिं विज्ञाय आपद्-ग्रस्त-जनानां साहाय्यार्थं पूर्ण-सर्मथनस्य आश्वासनं प्रदत्तम्।

## जम्मू-कश्मीर-प्रशासनेन 'श्री अमरनाथजी यात्रामुद्दिश्य एका नवीना निर्देशिका प्रसारिता

जम्मू-कश्मीर-प्रशासनेन 'श्री अमरनाथजी यात्रामुद्दिश्य एका नवीना निर्देशिका प्रसारिता, यस्यां सर्वैः तीर्थयात्रिभिः पञ्जीकरण प्रक्रियायाः अथ सुरक्षा मार्गदर्शिकानां निष्ठापूर्वकं दृढतापूर्वकं च पालनं कर्तुं समादिष्टम्। जम्मू-वार्ताहरैः विज्ञापितम् यत् सर्वोच्चन्यायालयस्य निर्देशानुसारं निर्धारिता यात्रिणां प्रतिदिनस्य संख्या-सीमा सम्प्रत्यपि पूर्णतो प्रवृत्ता वर्तते। श्रद्धालवः परामृष्टाः यत् यात्रा-प्रारम्भात् पूर्वमेव अग्रिम-पञ्जीकरणं करणीयम्, अथ अनुमति-पत्रे उल्लिखिते दिनाङ्के एव यात्रा आरम्भणीया। प्रशासनेन स्पष्टीकृतं यत् अनुपदमेव पञ्जीकरणस्य सुविधा अत्यन्तं सीमितसंख्यासु एव उपलब्धा अस्ति, सा च केवलं रिक्त स्थानानाम् उपलब्धताम् आधृत्य एव प्रदास्यते ।

## देशस्य मध्यम-एवं-पूर्वीयभागेषु अतिवृष्टेः मेघगर्जनस्य च कृते 'ऑरेंज-अलर्ट' इति नारङ्ग-वर्णीया संचेतना




भारतीय-ऋतु-विज्ञान-विभागेन देशस्य मध्यम-एवं-पूर्वीयभागेषु अतिवृष्टेः मेघगर्जनस्य च कृते 'ऑरेंज-अलर्ट' इति नारङ्ग-वर्णीया संचेतना प्रसारिता। अनेन सहैव ऋतु-विभागेन जम्मू-कश्मीर-लद्दाख-हरियाणा-चण्डीगढ़-हिमाचलप्रदेशेष्वपि अतिवृष्टेः पूर्वानुमानं विहितम्। विभागेनानेन संसूचितम् यत् आगामिषु द्वित्रिदिनेषु प्राग्वृट् उत्तर-अरब सागरस्य अवशिष्टेषु क्षेत्रेषु तथा च राजस्थान-हरियाणा पञ्जाबप्रान्तानां शिष्टेषु भूभागेषु अग्रे प्रवर्धमानः सन् सम्पूर्णे देशे पूर्णतः व्याप्तो भविष्यति ।।

# भारतस्य प्राचीनज्ञानपरम्परा कृत्रिमबुद्धिमत्तया (AI) प्राप्स्यति नूतनजीवनम् - प्रो. श्रीनिवासवरखेड़ी




**हिमसंस्कृतवार्ताः — नागपुरम्।** मानवता कृत्रिमबुद्धिमत्तायाः (AI) युगे प्रवेशं कृतवती अस्ति। अधुना अस्माकं दायित्वं वर्तते यत् अस्याः तकनीक-प्रणाल्याः (प्रौद्योगिक्याः) उपयोगः भारतस्य प्राचीनज्ञानपरम्परायाः, संस्कृतेः, धरोहरस्य च संरक्षणाय संवर्धनाय च करणीयः। एषा वार्ता केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिना प्रो. श्रीनिवासवरखेड़ीमहोदयेन केन्द्रीयसंस्कृत-विश्वविद्यालयस्य तथा च 'इमवर्स ए.आई.' (Imvers AI) इत्यनयोः संयुक्ततत्त्वावधाने आयोजितायाः २१ दिवसीय-ए.आई.-प्रशिक्षणकार्यशालायाः 'बिल्डिंग सिविलाइज़ेशनल ए आई फ्रॉम भारत' इत्यस्याः समापनसमारोहे कथिता। तेन प्रोक्तं यत् भारतस्य ज्ञानसम्पदः आधुनिकप्रौद्योगिक्या सह संयोजनं समयस्य आवश्यकता अस्ति। अस्यां दिशि केन्द्रीयसंस्कृतविश्वविद्यालयस्य इमवर्स-ए.आई. इत्यस्य च प्रयासः देशस्य कृते एकः अनुकरणीयः प्रतिरूपः (मॉडल) भवितुं शक्नोति। तेन ज्ञापितं यत् विश्वविद्यालयेन भारतीयज्ञानपरम्परायाः कृत्रिमबुद्धिमत्तायाः च समन्वयस्य दिशि क्रियमाणाः प्रचेष्टाः राष्ट्रियस्तरे अपि श्लाघिताः सन्ति। एतेषाम् उल्लेखः प्रधानमन्त्रिणः मनोगते अर्थात् 'मन की बात' इति कार्यक्रमे अपि विहितः अस्ति। तेन युनः आहूताः यत् ते केवलं प्रौद्योगिक्याः उपभोक्तारः भूत्वा न तिष्ठेयुः, अपितु नवाचार-अनुसन्धान-तकनीकविकासानां माध्यमेन भारतस्य ज्ञानाधारित-अर्थव्यवस्थायाः निर्मातारः भवेयुः। कार्यक्रमस्य शुभारम्भः अतिथिभिः मातुः शारदायाः चित्रपटस्य सम्मुखे दीपप्रज्वलनं कृत्वा विहितः। एतस्मात् परं केन्द्रीयसंस्कृतविश्वविद्यालयस्य छात्रकल्याणविभागस्य सहायकप्राध्यापिका समन्वयिका च डॉ. अमृताकौरमहोदया अन्तर्जालमाध्यमेन (ऑनलाइन) संयुज्य सर्वान् अतिथीन्, विद्वांसः, प्रशिक्षकान्, प्रतिभागिनश्च प्रति स्वागतम् अभिनन्दनं च व्याहृतवती। विशिष्टतिथिः प्रो. अतुलवैद्यः अवदत् यत् कृत्रिमबुद्धिमत्तायाः भविष्यं भारतीयज्ञाने, भारतीयभाषासु, भारतीयसन्दर्भेषु च आधारितं भवितव्यम्। तेन इमवर्स-ए.आई. इत्यस्य 'भारतीया जीपीटी' (Bharatiya GPT) इति प्रचेष्टां भारतस्य सभ्यतागतधरोहणम् आधुनिकप्रौद्योगिक्या सह सङ्योजयन्तीं नूतनं प्रयासं प्रतिपाद्य कथितं यत् एतादृशाः प्रयासाः भारतं 'सिविलाइज़ेशनल ए आई' क्षेत्रे वैश्विकं नेतृत्वं प्रदास्यन्ति। 'इमवर्स ए.आई.' संस्थायाः सह-संस्थापिका मुख्यपरिचालनाधिका री च प्रीतिरामकृष्णन महोदया अवदत् यत् कृत्रिमबुद्धिमत्ता केवलं तकनीकीक्रान्तिः नास्ति, अपितु सभ्यतागतम् उत्तरदायित्वं वर्तते। तया ज्ञापितं यत् संस्था पाण्डुलिपीनां, शिलालेखानां, मौखिकानां ज्ञानपरम्पराणां च ए.आई.-आधारित-ज्ञानसंसाधनेषु परिवर्तनं कृत्वा भारतस्य बौद्धिकविरासतं विश्वं यावत् प्रामाणिकरूपेण प्रापयितुं कार्यं करोति। अस्यां २१ दिवसीयायां कार्यशालायां देशस्य २३ प्रतिष्ठितेभ्यः संस्थानेभ्यः चयनं प्राप्ताः १८ संस्कृतविद्वांसः पाण्डुलिपि-अङ्कीकरणं (डिजिटलीकरण), ऑप्टिकल कैरेक्टर रिकग्निशन (OCR), हस्तलिपि-परिचयं, भारतीयभाषाप्रौद्योगिकी, मशील-लर्निंग, जनरेटिव ए.आई. तथा च सिविलाइज़ेशनल ए.आई. सदृशविषयेषु व्यावहारिकं प्रशिक्षणं प्राप्तवन्तः। विशिष्टतिथिः मङ्गेश-इन्दा-पवारः अपि सम्बोधितवान्।

**प्रतिभागिभिः अनूभूताः स्वकीय-अनुभवाः प्रकटिताः**

कार्यशालायाः प्रतिभागिभ्याम् अजयनागरेण ईश्वरीदीक्षितेन च स्वकीय-अनुभवाः साझीकृताः। अजयनागरेण कथितं यत् "अध्ययनाय जिज्ञासोः भवितुम् अतीव आवश्यकं वर्तते। जिज्ञासा एव जनं नूतनज्ञानाय, नूतनप्रौद्योगिक्यै, नवाचाराय च अग्रे सारयति।" तेन उक्तं यत् अनेन प्रशिक्षणेन संस्कृतस्य कृत्रिमबुद्धिमत्तायाः च समन्वयः व्यावहारिकरूपेण अवगन्तुम् अवसरः प्राप्तः। यत्रैव ईश्वरीदीक्षितेन प्रोक्तं यत् कार्यशालायाः अन्तराले वैज्ञानिकानां मार्गदर्शने कार्यं कुर्वन् भारतीयज्ञानपरम्पराम् आधुनिकप्रौद्योगिक्या सह योजयितुं नूतना दृष्टिः प्राप्ता, या भविष्यस्य अनुसन्धाने नवाचारे च अतीव उपयोगिनी सिद्धा भविष्यति। समापनावसरे उत्कृष्टप्रदर्शनाय डॉ. दर्शनाजैनमहोदया, केतनपुराणिकः, शुभेन्दुशशाङ्कश्च सम्मानिताः। सर्वेभ्यः १८ प्रतिभागिभ्यः प्रशिक्षणपूर्णात् परं प्रमाणपत्राणि वितरितानि। कार्यक्रमस्य सञ्चालनम् अमेयवैद्येन विहितम्। अन्ते रुचिकाबोबड़ेमहोदयया सर्वान् अतिथीन्, विद्वांसः, प्रशिक्षकान्, प्रतिभागिनः, आयोजकांश्च प्रति कृतज्ञता ज्ञापिता। कार्यक्रमस्य समापनं 'वन्दे मातरम्' इति गीतस्य सामूहिकगायनेन साकम् अभवत्।

# १४ वर्षपुरातने ए.सी.पी.-विवादे शिक्षाविभागस्य निर्णयः,

## विद्यालयप्रवक्तृभ्यः प्राप्स्यते वेतनलाभः

**हिमसंस्कृतवार्ताः — शिमला ।** हिमाचलप्रदेश-विद्यालयीय-शिक्षा-निदेशालयेन प्रदेशस्य प्रवक्तृभिः सम्बद्धस्य १४ वर्षपुरातनस्य सुदीर्घकालात् प्रलम्बितस्य 'एश्योर्ड करियर प्रोग्रेशन' (ACP) इत्यस्य प्रकरणस्य निर्णयं कुर्वता वेतनलाभं प्रदातुं निर्णयः गृहीतः। वित्तविभागस्य दिशानिर्देशानुसारं पात्राणां प्रवक्तृणां वेतनं 'ए.सी.पी.' योजनायाः (४-९-१४) अन्तर्गतं पुनर्निर्धारयिष्यते, यत्रैव नियमितीकरणस्य भिन्न-पूर्वतिथीनाम् आधारेण प्रदत्ताः ए.सी.पी.-लाभाः प्रतिगृह्णिष्यन्ते। उच्च-शिक्षा-निदेशालयेन बुधवासरे प्रसारितेन आदेशानुसारम् एषः निर्णयः वित्तविभागस्य वर्ष २०१२ तथा २०१४ तमे वर्षे कृतानां स्पष्टीकरणानाम् आधारेण स्वीकृतः। आदेशे प्रतिपादितं यत् पात्रप्रवक्तृभ्यः ८ अगस्त २०१२ पर्यन्तं 'नोशनल' (काल्पनिक) आधारेण तथा च ९ अगस्त २०१२ दिनाङ्कतः वास्तविक-वित्तीय-लाभः प्रदास्यते। आदेशस्य प्रतिलिपयः महालेखाकारकार्यालयं (AG Office), उपनिदेशकान्, सम्बद्धान् विद्यालयान् च प्रति प्रेषिताः, येन लाभान्वितानां प्रकरणानाम् उपरि आगामिकार्यविधिं कर्तुं शक्येत। एषः विषयः बहुभ्यः वर्षेभ्यः प्रलम्बितः आसीत् विभिन्नस्तरेषु च स्पष्टीकरणानि याच्यन्ते स्म। अधुना आदेशप्रसारणेन प्रभावितानां शिक्षकाणां वित्तीयलाभप्राप्तेः मार्गः सुगमः जातः। सम्प्रति सर्वे लाभाः 'ऑडिट' (लेखापरीक्षा) सत्यापनस्य अधीनाः भविष्यन्ति। यदि भविष्ये कस्यापि प्रकारस्य अतिरिक्तभुक्तिः त्रुटिः वा सम्मुखम् आगमिष्यति, तर्हि सम्बद्धाय अधिकारिणे कर्मचारिणे वा सम्पूर्णा राशिः एकांशेन प्रतिप्रदातव्या भविष्यति। एतदर्थं लाभान्वितेभ्यः लिखितं प्रतिज्ञापत्रं ('अण्डरटेकिंग') ग्रहीतुं सेवापुस्तिकायां च तस्य अङ्कनं कर्तुं निर्देशाः दत्ताः सन्ति। प्रतिज्ञापत्रस्य पूर्णात् परमेव अवशिष्टराशेः (एरियर इत्यस्य) भुक्तिः विधास्यते।

# जयरामः अवदत्- 'सूटकेस' (पेटिकायाः) रहस्यं प्रकटीकरोतु सर्वकारः, धर्मशालां सम्प्राप्तः नेताप्रतिपक्षः काङ्ग्रेसनेतॄन् प्रति उत्थापितवान् प्रश्नान्

हिमसंस्कृतवार्ताः — धर्मशाला। हिमाचलप्रदेशे 'सूटकेस' (पेटिका) राजनीतम् अधिकृत्य शिथिलां विधि-व्यवस्थां च प्रति पूर्वमुख्यमन्त्री नेताप्रतिपक्षश्च जयरामठाकुरः प्रदेशसर्वकारस्य उपरि साक्षात् तीक्ष्णञ्च प्रहारं विहितवान्। धर्मशालां सम्प्राप्तः जयरामठाकुरः मुख्यमन्त्रिणं सुखविन्दरसिंहसुक्खू महोदयम् उद्दिश्य प्रश्नं चिक्षेप यत् अन्ततः अस्य सूटकेस-प्रकरणस्य रहस्यं किम् अस्ति? तेन कथितं यत् मुख्यमन्त्रिणा इतस्ततः सम्भाषणं विहाय स्वकीयस्य एव दलस्य (पार्टी) नेत्रा उत्थापितानां तेषां गम्भीराणाम् आरोपाणां उत्तरं प्रदातव्यम्, येषुकाङ्गड़ा-क्षेत्रात् सूटकेस-पेटिकाः सङ्गृह्य देहलीं प्रापयितुं स्वयं पार्श्वे च स्थापयितुं वार्ता उक्ता अस्ति। अनेन सहैव तेन बिलासपुरे दिवाकाल एव कस्यचित् युवकस्य कुठारेण (कुल्हाड़ी से) हिंसनस्य घटनां प्रदेशे विधि-व्यवस्थायाः पूर्णतया विनष्टस्य प्रमाणं प्रतिपादितम्। 'दीनदयाल उपाध्याय महाप्रशिक्षण अभियान' इत्यस्मिन् भागं ग्रहीतुं सम्प्राप्तः नेताप्रतिपक्षः पत्रकारैः साकं वार्तालापं कुर्वन् राज्यसर्वकारातः बहून् प्रश्नान् पृष्टवान्। तेन आरोपः कृतः यत् प्रदेशसर्वकारः काङ्गड़ा-क्षेत्रे पूर्वतन-भाजपा-सर्वकारेण आरब्धेषु विकासकार्येषु विघ्नं उत्पादयति।

# २३ लक्षोपभोक्तृणां ई-केवाईसी (e-KYC), १८ लक्षजनेभ्यः द्वि-विद्युन्मानके साहाय्यकधनस्य लाभः




## विद्युन्मण्डले द्वयोः मानकयोः साहाय्यकधनप्रदानस्य निर्णयात् परं प्रचलति ई-केवाईसी-प्रक्रिया

हिमसंस्कृतवार्ताः — शिमला। द्वयोः विद्युन्मानकयोः (बिजली मीटर) उपरि साहाय्यकधनं (सब्सिडी) प्रदातुं सर्वकारस्य निर्णयात् परं सम्पूर्णे राज्ये ई-केवाईसी-प्रक्रिया वेगेन प्रचलति। राज्ये २३ लक्षाद् अधिकानाम् उपभोक्तृणां ई-केवाईसी-कार्यं पूर्णं जातम्। अस्मिन् १८ लक्षाद् अधिकेभ्यः जनेभ्यः द्वयोः विद्युन्मानकयोः साहाय्यकधनस्य लाभः विद्युन्मण्डलेन (बिजली बोर्ड) प्रदत्तः अस्ति। यद्यपि ई-केवाईसी-प्रक्रियायां काश्चन त्रुटयः अपि सम्मुखम् आगताः, यासां निवारणाय विद्युन्मण्डलप्रबन्धनेन प्रभावीनि कर्माणि क्रियन्ते। उल्लेखनीयं वर्तते यत् राज्यसर्वकारेण अस्मिन्नेव वर्षे राज्ये एकस्मै उपभोक्त्रे द्वयोः मानकयोः १२५-१२५ यूनिट् यावत् निःशुल्कविद्युत् प्रदातुं निर्णयः स्वीकृतः। एतस्मात् परं विद्युन्मण्डलेन प्रदेशे द्वयोः विद्युन्मानकयोः एतया सुविधया सह योजयितुं ई-केवाईसी-प्रक्रिया आरब्धा। राज्यविद्युन्मण्डलात् प्राप्त-विवरणानुसारं जूनमासस्य अन्तिमं यावत् प्रदेशे २४,८३,१९३ सक्रियाः घरेलु-विद्युद्-उपभोक्तारः सन्ति। एतेषु २३,७९,५२४ उपभोक्तृभिः स्वकीयम् ई-केवाईसी-कार्यं पूर्णं विहितम्। जूनमासस्य विवरणानुसारं राज्ये विभिन्नश्रेणीनां आहत्य २९,६९,०७२ विद्युद्-उपभोक्तारः सन्ति, येषु घरेलुश्रेण्याः उपभोक्तृणां सङ्ख्या २४.८३ लक्षं दर्ज अस्ति। विभागेन एतेषाम् उपभोक्तृणां चरणबद्धरूपेण ई-केवाईसी कारितं, येन उपभोक्तृणां शुद्धं परिचयं सुनिश्चितं भवेत् साहाय्यकधनस्य लाभः च केवलं वास्तविक-लाभान्वितेभ्यः एव प्राप्नुयात्।

## ई-केवाईसी-प्रक्रियायाः परं साहाय्यक-धनग्रहीतृणां सङ्ख्यायां न्यूनता

अपरपक्षे ई-केवाईसी-व्यवस्थायाः निर्माणात् परं साहाय्यकधनं प्राप्नुवताम् उपभोक्तृणां सङ्ख्यायां न्यूनता अङ्किता अस्ति। जून २०२६ तमे वर्षे १८,०६,८२२ घरेलु-उपभोक्तृभ्यः विद्युत्-साहाय्यकधनं प्रदत्तम्, यत्रैव ई-केवाईसी-अनिवार्यत्वात् पूर्वम् एषा सङ्ख्या अधिका आसीत्। जनवरी २०२६ तमे वर्षे २२,५९,४९८ उपभोक्तृभ्यः, फरवरीमासे २२,८०,००२ उपभोक्तृभ्यः तथा च मार्चमासे २३,९४,८१६ उपभोक्तृभ्यः विद्युत्-साहाय्यकधनं दत्तम् आसीत्। मण्डलस्य मान्यता अस्ति यत् ई-केवाईसी-प्रणाल्याः प्रयोगात् साहाय्यकधनवितरणव्यवस्था भूयः पारदर्शिनी संजाता। यद्यपि प्रदेशस्य विभिन्नेभ्यः भागेभ्यः ई-केवाईसी-प्रक्रियायां त्रुटीनां वार्ता अपि सम्मुखम् आगता आसीत्। अस्य अन्तर्गतं कस्यचित् एकस्य उपभोक्ता-आईडी (ID) मध्ये बहूनि नामानि सङ्योजितानि दृष्टानि। कतिपयेषु प्रकरणेषु एकस्य एव उपभोक्तुः नाम्नि भिन्नानि खाद्यान्नपत्रकाणि (राशनकार्ड) अपि पञ्जीकृतानि प्राप्तानि। अस्मिन् विद्युन्मण्डलप्रबन्धनेन कठोरं सञ्ज्ञानं (गम्भीरता) स्वीकुर्वता एतासां त्रुटीनां दूरीकरणाय दिशानिर्देशाः पूर्वमेव प्रसारिताः। सम्प्रति मण्डलप्रबन्धनस्य कथनमस्ति यत् ई-केवाईसी-प्रक्रियायां प्राप्तानां त्रुटीनां परिष्कारः विधीयते। एतस्याः प्रक्रियायाः पूर्णात् परं साहाय्यकधनवितरणव्यवस्था भूयः पारदर्शिनी प्रभावशालिनी च भविष्यति इति आशा वर्तते।

# मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू महोदयस्य अध्यक्षतायां २० जुलाई दिनाङ्के भविष्यति मन्त्रिमण्डलस्य उपवेशनम्



**हिमसंस्कृतवार्ताः — शिमला।** हिमाचलप्रदेशमन्त्रिमण्डलस्य उपवेशनं मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू महोदयस्य अध्यक्षतायाम् आयोजितं विधास्यते। उपवेशने सर्वकारस्य विभिन्नेभ्यः विभागेभ्यः सम्बद्धाः बहवः प्रमुखाः कार्यसूच्यः (एजेंडे) उपस्थापयिष्यन्ते। एतत् उपवेशनं २० जुलाई दिनाङ्के प्रातः ११:०० वादने प्रारप्स्यते। मन्त्रिमण्डलं विभिन्नेषु विभागेषु रिक्तपदानि पूरयितुं, आपदा-साहाय्यं, अन्यान् विषयान् च अधिकृत्य प्रमुखान् निर्णयान् ग्रहीतुं शक्नोति। अस्मिन् उपवेशने विभिन्नानां विभागानां प्रस्तावेषु अपि मन्त्रिमण्डलस्य स्वीकृतिः प्राप्तुं सम्भावना वर्तते।

## 'मेडिकल डिवाइस पार्क' इत्यस्य कृते वित्तीयव्यवस्थायाः प्रकरणं मन्त्रिमण्डले नेष्यते

अपरपक्षे सोलनमण्डलस्य नालागढ-क्षेत्रे निर्माणमाणस्य 'चिकित्सोपकरण-वाटिका (मेडिकल डिवाइस पार्क') इत्यस्याः योजनां सफलीकर्तुं बुधवासरे सचिवालये उद्योगविभागस्य अधिकारिणां सुदीर्घं (मैराथन) उपवेशनं सम्पन्नम्। अस्मिन् विभागेन राज्यसर्वकाराय सूचितानां चतुर्णां विकल्पानाम् उपरि विमर्शः कृतः। अधुना एषः विषयः मन्त्रिमण्डलस्य उपवेशने आनेतुं प्रक्रमः प्रचलति। उपवेशनस्य अध्यक्षतां उद्योगविभागस्य प्रधानसचिवः आर.डी. नजीम महोदयः विहितवान्। डिवाइस-पार्क-क्षेत्रे प्रख्याताः संस्थाः (कंपनियां) निवेशं कर्तुं सज्जाः सन्ति, परन्तु वाटिकायां उद्योगपतिभ्यः सौकर्याणि उपलब्धं कारयितुं धनस्य अभावः वर्तते। विभागेन सूचितेषु चतुर्षु परामर्शेषु— ऋणं (लोन) गृहीत्वा वाटिकायाः निर्माणं करणं, भूमिं विक्रीय, सर्वकारपक्षतः धनप्रदानं, अथवा पी.पी.पी. (PPP) प्रणाल्या निर्माणं सम्मिलितानि सन्ति। सर्वकारः अपि एतां परियोजनां (प्रोजेक्ट) स्वहस्तात् बहिः नेतुं न इच्छति। ज्ञाप्यते यत् 'स्प्रे इंजीनियर' संस्थायाः कृते भूमिं प्रदाय उद्यानस्य निर्माणं कर्तुं शक्यते। चिकित्सोपकरण-वाटिका इत्यस्याः कृते विभागस्य पार्श्वे ३०० एकड-परिमितं भूमिः वर्तते। मुख्यमन्त्रिणः उपस्थितौ उद्योगविभागस्य अधिकारिणां संस्थायाः च मध्ये सहमति-ज्ञापने (MoU) हस्ताक्षराणि कारितानि। उल्लेख्यं वर्तते यत् स्प्रे-इंजीनियर-संस्थया सर्वकारातः १०० एकड-परिमितं भूमिः याचिता। संस्था अत्र एथेनॉल-हरितहाइड्रोजन-उत्पादनस्य उद्योगं स्थापयितुम् आकांक्षते। एषा संस्था बद्दी-क्षेत्रे पूर्वमेव यन्त्राणि सज्जीकरोति। 'मैसर्स स्प्रे इंजीनियरिंग डिवाइसेज लिमिटेड' इत्यनया संस्थया हिमाचले १४०० कोटिरूप्यकाणां निवेशस्य वार्ता कथिता आसीत्। मेडिकल-डिवाइस-माध्यमेन हिमाचलस्य प्रायः ५,००० (पञ्चसहस्र) जनेभ्यः रोजगारः प्राप्स्यते।

# डीएवी पब्लिक विद्यालये स्वांग, बोकारो, झारखण्ड कनीयशाखायां वृक्षारोपणस्य महदायोजनम्



**हिमसंस्कृतवार्ताः-** वन महोत्सवस्य अवसरे डीएवी पब्लिक स्कूल स्वांग, बोकारो, झारखण्ड कनीय शाखायां वृक्षारोपणस्य महदायोजनं कृतम्। सर्वे अभिभावकाः एकेन पादपेन सह विद्यालयम् आगत्य वृक्षवपनं कृतवन्तः। प्राचार्यमहोदयः वृक्षस्य महत्त्वोपरि विस्तृतं वर्णनं कृतवान्। अधुना जगति सर्वत्र प्रदूषणम् एका महती समस्या विद्यते। अस्याः निवारणं केवलं वृक्षारोपणमेवास्ति। अतः अस्माकं धर्मः यत् वयं मिलित्वा अधिकाधिकं वृक्षारोपणं तेषां संरक्षणं अपि कुर्याम। समारोहे विद्यालयस्य सर्वे शिक्षकाः शिक्षिकाः, अभिभावकाः, छात्र-छात्राश्च उत्साहपूर्वकम् उपस्थिताः आसन्।

# गुरुरविदास-क्लबेन चर्मकारसमाजस्य गुणवतां विद्यार्थिनां

## सम्मानसमारोहस्य आयोजनम्, सांसदः, मन्त्रिणः, विधायकश्च उपस्थिताः भविष्यन्ति




**हिमसंस्कृतवार्ताः- जलग्रामः।** जलग्रामस्थितेन गुरुरविदास-क्लबेन आगामिनि रविवासरे, १२ जुलाई प्रातः १०:०० वादने, केमिस्टभवने, जिल्हापेठे, जलग्रामे चर्मकारसमाजस्य गुणवतां विद्यार्थिनां सम्मानसमारोहः भव्यतया आयोज्यते। अस्य समारोहस्य उद्घाटनं महाराष्ट्रराज्यस्य वस्त्रोद्योगमन्त्री माननीयः संजयभाऊ सावकारे महोदयस्य शुभकरकमलैः भविष्यति। अस्मिन् शुभावसरे जलसम्पदामन्त्री माननीयः गिरिशभाऊ महाजनः, पानीयपुरवठामन्त्री, जलग्राम मण्डलस्य पालकमन्त्री माननीयः गुलाबराव पाटीलः, सांसदा माननीया स्मिताताई वाघ, विधायकः राजूमामा भोळे, महापौरा सौ. दीपमाला काळे, भूतपूर्वमहापौरः विष्णूभाऊ भंगाळे, गटशिक्षणाधिकारी विजय पवारः, नगरसेविका सौ. सुरेखा नितीन तायडे इत्यादयः प्रमुखातिथयः उपस्थिताः भविष्यन्ति।
कार्यक्रमस्य अध्यक्षतां भूतपूर्वोपशिक्षणाधिकारी माननीयः यशवंतराव ठोसरे महोदयः करिष्यति। भूतपूर्वप्राचार्यः माननीयः नीलकण्ठराव गायकवाडः (जिला-शिक्षण-प्रशिक्षण-संस्था, जलग्रामः) विद्यार्थिभ्यः प्रेरणाप्रदं मार्गदर्शनं प्रदास्यति। सेवानिवृत्तमुख्याभियन्ता डॉ. राजेन्द्र बाविस्करः विशेषातिथिरूपेण उपस्थितः भविष्यति। समारोहेऽस्मिन् जलग्रामजिल्हस्य चर्मकारसमाजस्य दशमकक्षायाः, द्वादशकक्षायाः, स्नातक- स्नातकोत्तर- संशोधन- छात्रवृत्ति- विविधस्पर्धापरीक्षा- NEET, JEE, CET इत्यादिषु परीक्षासु उत्कृष्टं यशः प्राप्तवतां विद्यार्थिनां सार्वजनिकः सत्कारः विधास्यते। एतदर्थं पूर्वमेव विद्यार्थिनां नामपञ्जीकरणं सम्पन्नम्। एतत् आयोजनं गुरुरविदास-क्लबस्य अध्यक्षेन डॉ. सुनील सूर्यवंशी, सचिवेन प्रदीप शेकोकारः, प्रा. विठ्ठल सावकारे, धीमन्त पी. आर. आंबेडकरः, संजय बाविस्करः, प्रा. स्मिता जयकरः इत्यादिभिः सूचितम्।
अस्य समारोहस्य सफलसम्पादनार्थं प्रा. संजय सूर्यवंशी, डी. डी. ठोसरे, सौ. ज्योती निंभोरे, गजानन दांडगे, प्रा. संदीप शेकोकारः, प्रा. गणेश सूर्यवंशी, डॉ. संजय भटकरः, खंडूजी पवारः, कैलास विसावे, डॉ. सुनील निंभोरे, युवराज घोलाणे, कैलास सोनवणे, श्री जगन्नाथ निंभोरे, दिलीप दांडगे, निवृत्ती सूर्यवंशी, संजय निंभोरे, प्रा. आत्माराम चिमकरः, प्रा. माणिक बागले, गणेश राऊतः, अरुण नेटके, सुनील वानखेडे, अशोक लोखंडे, अनिलवानखेडे, अन्ये अनेके कार्यकर्तारश्च समर्पणभावेन परिश्रमं कुर्वन्ति।
गुरुरविदास-क्लबस्य वतीतः जलग्रामजिल्हस्य समस्तान् चर्मकारसमाजबान्धवान् सपरिवारम् अस्मिन् गौरवमये समारोहे उपस्थितुं सस्नेहम् आमन्त्रणं प्रदत्तम्।

# लौकिकन्यायकोशः

## काकाधिकरणन्यायः

देवदत्तस्य गृहं कुत्र वर्तते इति इति एकेन पृष्टे सति अन्येन उक्तं यत्र काकाः तिष्ठन्ति तद् देवदत्तस्य गृहम् इति। काकस्य उपवेशनम् इति गृहस्य स्थिरं लक्षणं न भवितुमर्हति, तथा कस्यचिदेव अंशस्य विवरणं कृतमिति बोधयितुमस्य प्रयोगो भवति। तात्कालिकं लक्षणमित्यपि अस्य अर्थः।

**डा. वर्षा प्रकाश टोणगांवकर पुणे, महाराष्ट्रम्**

## 'पिनाका' इति सुदीर्घदूरीप्रहारक-रॉकेट-प्रणाल्याः सफलं परीक्षणम्

रक्षाअनुसंधान-विकाससंगठनस्य (डी.आर.डी.ओ.) ओडिशाराज्यस्य चांदीपुरस्थे एकीकृतपरीक्षणपरिसरे (आई.टी.आर.) 'पिनाका' इति सुदीर्घदूरीप्रहारक-रॉकेट-प्रणाल्याः (एल.आर.जी.आर.) सफलं परीक्षणं कृतवान्। रक्षा मन्त्रालयेन संसूचितं यत् एतस्य रॉकेट-अस्त्रस्य परीक्षणं प्रयोक्त्रा (सेशेन) निर्धारितं न्यूनतमं षष्टि (६०) किलोमीटरमितं दूरेः कृते कृतम्।पिनाका एल.आर.जी.आर.-प्रणाल्याः अभिकल्पनं (डिजाइन) आयुधअनुसंधान-विकासप्रतिष्ठानेन उच्चऊर्जासामग्री-अनुसंधानप्रयोगशालायाः सहयोगेन कृतम् अस्ति। एतदर्थं रक्षाअनुसंधान-विकासप्रयोगशालायाः तथा च 'इमारत अनुसंधान केंद्र' (आर.सी.आई.) इत्यस्याः अपि पूर्णं समर्थनं प्राप्तम्। एषः रॉकेटः सेनायां पूर्वमेव सम्मिलितात् 'पिनाका लॉन्चर' (प्रक्षेपक) इत्यस्मात् प्रक्षेपितः, येन एतत् प्रमाणितं भवति यत् एकेनैव प्रक्षेपकेण विभिन्नश्रेणीनां पिनाका-रॉकेटानां सफलं प्रपेक्षणं कर्तुं शक्यते। रक्षामन्त्री राजनाथसिंहः पिनाका एल.आर.जी.आर. इत्यस्य सफलपरीक्षणाय डी.आर.डी.ओ., भारतीयसेनां तथा च उद्योगजगत् वर्धापितवान्।



**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**

# वार्तासंवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
**नन्दिनी-** अद्य एका विचित्रा वार्ता नूतन- जर्सी- प्रदेशात् प्राप्ता। तत्र सुरक्षार्थं गता एका आरक्षकनौका एकेन महातिमिङ्गिलेन निमज्जिता। तिमिङ्गिलः नौकायाः अधः उत्थितः, तेन च नौका भिन्ना भूत्वा जले मग्ना। किन्तु भाग्यवशात् सर्वे सैनिकाः रक्षिताः।
**काव्या-** अहो! महाकायस्य तिमिङ्गिलस्य बलं तु अद्भुतमस्ति! देवकृपयैव ते सैनिकाः रक्षिताः। अन्या काचित् आमोदकरी वार्ता वर्तते। एका मैक्रोसोफ्ट-संस्था अस्ति। तस्याः कश्चित् कर्मचारी कार्यमुक्तिं प्राप्य अतीव सन्तुष्टः जातः अस्ति। साधारणतः जनाः कार्यमुक्तेः भीताः भवन्ति, किन्तु तेन चिन्तितं यत् बहुकार्यपीडया जीवनं नष्टं भवति, अतः मुक्तावस्था एव वरा इति। तेन स्वकीयेन सन्देशेन समाज-माध्यमे प्रमोदः प्रकटितः।
**नन्दिनी-** सत्यमुक्तम्! अतिश्रमेण मनुष्यः क्लिश्यति, अतः तस्य कार्यमुक्तिः वरम्। इतः परं शृणु। क्यालिफोर्नियाप्रदेशे एकस्मिन् शवसंस्कारगृहे मतदानकेन्द्रं स्थापितम्। अधिकारिभिः तदेव मतदानकेन्द्रम् अद्य अपि स्वीकृतम् अस्ति। तत्र गत्वा द्विशताधिकैः जनैः मतदानं कृतम्। केचन जनाः एतत् स्थानं भीकरं मन्यन्ते, किन्तु अधिकारिणः कथयन्ति यत् एतत् स्थानं मतदानार्थं सुष्ठु अस्ति।
**काव्या-** ईदृशं भीकरं स्थानं मतदानार्थं स्वीकृतम् इति तु आश्चर्यावहम्! प्रेतानां मध्ये मतदानं केन कल्पितम्? अन्ते अन्या प्रहर्षिणी वार्ता अस्ति। विश्वकन्दुकक्रीडास्पर्धायां नोरवे-देशस्य दलेन ब्राजिल-देशस्य दलं पराजितम्। अनेन विजयेन नोरवे-देशे सर्वत्र उत्सवः जातः। तत्रत्याः सैनिकाः अपि अतीव प्रसन्नाः सन्तः बैंकिंग- नौकाचालन- नृत्यं कृतवन्तः सन्ति। तेषां सैन्यवेशे कृतं नृत्यं सर्वैः दृष्टम् अस्ति।
**नन्दिनी-** अहो! देशस्य विजये सैनिकानाम् उत्साहः अपूर्वः एव! तेषां सैन्यवेशे नृत्यं दृष्ट्वा मम हृदयम् अपि प्रफुल्लितं जातम्। एताभिः वार्ताभिः सह अद्यतनः कार्यक्रमः अत्रैव समाप्यते। पुनर्मेलिष्यामः!

# संस्कृतं मधुरं सदा - ५४

## (व्याकरणचिन्तनम्)

अनुस्वार-सन्धिः - कस्यचन पदस्य अन्ते हलन्त-'म्' इत्यस्य परे यदि व्यञ्जनवर्णो भवति, तर्हि 'म्' इति स्थाने अनुस्वारः (ं) भवति (मोऽनुस्वारः) । यथा -
धनम् + याचते = धनं याचते ।
पुस्तकम् + पठति = पुस्तकं पठति।
गृहम् + गच्छति = गृहं गच्छति ।
**व्यतिक्रमः**
१) पदान्त-'म्' इत्यस्य परे कश्चन अपि स्वरवर्णो भवेत्, तदा 'म्'-स्थाने अनुस्वारो न भवति, परन्तु परवर्णेन स्वरवर्णेन सह संयुक्तो भवति । यथा -
देवम् + अर्चय = देवमर्चय ।
पुस्तकम् + आनय = पुस्तकमानय
२) अन्तिमपदस्य पदान्त-'म्' इत्यस्य अनुस्वारो न भवति । यथा -पश्य हरिम् । गच्छ विद्यालयम् । पठतु संस्कृतम् ।
३) उष्मवर्णः (श् ष् स् ह्), अथवा क/ट/प-वर्गाणां कश्चन वर्णः परे स्यात्, तर्हि पदमध्यस्थयोः 'म्', 'न्' इत्यनयोः वर्णयोः स्थाने अनुस्वारो भवति । यथा -दम् + शनम् = दंशनम् । सम् + शयः = संशयः ।
४) क्विप्-प्रत्ययान्तः राज्-धातुः यदि परे तिष्ठति, तर्हि 'म्'-स्थाने अनुस्वारो न भवति । यथा -
सम् + राट् (ज) = सम्राट्।
५) कृ-धातुतो निष्पन्नशब्दः यदि परे तिष्ठति, तदा सम्-शब्दस्य 'म्'-स्थाने अनुस्वारः तथा स्-कारस्य आगमो भवति (समः सुटि) । यथा -सम्+कृतः = संस्कृतः ।
सम् + कारः = संस्कारः ।
६) वर्गस्य प्रथमः/द्वितीयो वा वर्णः यदि परे तिष्ठति, तर्हि पुम्-शब्दस्य 'म्'-स्थाने अनुस्वारः तथा स्-आगमो भवति । यथा -
पुम् + चातकः = पुंश्चातकः ।
**परसवर्णसन्धिः**
पदमध्यस्थितस्य अनुस्वारस्य परे यदि वर्गस्य यः कोऽपि वर्णः स्यात्, अथवा य् र् ल् व् इत्येतेषाम् अन्यतमः स्यात्, तर्हि तस्य अनुस्वारस्य स्थाने वर्गस्य पञ्चमवर्णः संयुज्यते (अनुस्वारस्य ययि परसवर्णः) । यथा - आशं + कते = आशङ्कते ।गं + गा = गङ्गा
**व्यतिक्रमः**
यदि स्पर्शवर्णाः परे तिष्ठेयुः, तर्हि पदस्य अन्ते स्थितस्य 'म्'-कारस्य स्थाने अनुस्वारो भवति, अथवा तस्य वर्गस्य पञ्चमवर्णो भवति । यथा -किम्+करोषि = किं करोषि/किङ्करोषि ।
क्षिप्रम् + चलति = क्षिप्रं चलति/क्षिप्रञ्चलति ।
धनम् + ददाति = धनं ददाति/धनन्ददाति ।
चन्द्रम् + पश्यति = चन्द्रं पश्यति/चन्द्रम्पश्यति इति ।